ISSN - 2249 - 0663

# ज्ञानस्वरूपम्

–विद्वान् भास्कर जोशि

अस्ति तावत् सर्वेषां प्राणिनां ज्ञानापेक्षा आजन्म आ च मरणात् । यथा हि सद्य एव लब्धजन्मा बालः स्वीयां मातरं स्तन्यदायिनीं ज्ञात्वा स्तन्यपानप्रकारं च स्तन्यं पीत्वा जीवति वर्धते वा तथैव हि सर्वे जनाः अन्यासु अवस्थासु तं तम् उपायं स्वहिताय अहितपरिहाराय वा ज्ञात्वा एव तस्मिंस्तस्मिन् उपाये प्रवर्तमानः स्वम् इष्टम् आप्नोति अनिष्टं वा दूरीकुरुते इति सर्वेषां नः सुविदितमेव ।

तच्च ज्ञानं यदि यथार्थं स्यात् तर्हि पुमान् तेन ज्ञानेन फलम् आप्नोति अन्यथा तु न आप्नोति इष्टं क्वचित् अनिष्टम् एव वा आप्नोति, यथा बालः हनूमान् सूर्यं फलं मत्वा तत्समीपं गतः अपि नाप क्षुधः निवारणं तृप्तिं वा आप्तवांस्तु देवराजस्य महतः क्रोधफम् । बालस्य तस्य यत् फलत्वज्ञानं सूर्ये तस्य अवस्तुविषयत्वात् । तदेव किञ्चित् फलम् आम्रादि दृष्ट्वा यदि तेन आशास्यत, अवश्यं तेन तृप्तिः अलप्स्यत तदनेन विज्ञायते यत् अस्ति समीचीनस्य ज्ञानस्य अपेक्षा इति ।

अतः एव वृध्दैः उक्तम्–

सर्पान् कुशाग्राणि तथोदपानं
ज्ञात्वा मनुष्याः परिवर्जयन्ति ।
अज्ञानतः तत्र पतन्ति केचित्
ज्ञाने फलं पश्य यथाविशिष्टम् ॥ इति॥



Scanned with CamScanner

अत्र श्लोके ज्ञानाज्ञानयोः यथा विरुद्धफलजनकत्वम् अभिमतं तथैव समीचीनज्ञानतद्विरुध्दज्ञानयोः अपि इत्येतत् अपि विवक्षितम् अस्ति । यथा च ज्ञाने सति कूपादेः तत्रापतनम्, अज्ञाने सति तत्र पतनं च भवतः तथैव समीचीनज्ञाने सत्येव तत्र अपातः तद्विरूद्धज्ञाने सति तु तत्र पातः एव इत्योपि वक्तुं शक्यम् ।

वस्तुतस्तु अत्र ज्ञानपदेन समीचीनं ज्ञानम् एव विवक्षितम् आस्ते । औत्पातिकेन ज्ञानेन समीचीनस्य फलस्य लब्धुम् अशक्यत्वात्। तथा च उक्तः श्लोकः समीचीनज्ञानापेक्षाम् एव स्थिरीकरोति इति सिध्यति ।

१.२. ज्ञानद्वैविध्यं प्रमाकरणविवेचनञ्च

तच्च यथाभूतार्थविषयं ज्ञानं प्रमा इति उच्यते, तद्भिन्नं ज्ञानं च अप्रमा इति भ्रमः इति वा । प्र इत्युपसर्गपूर्वकात् माङ् माने इति धातोः आतोोपसर्गे(१) इति सूत्रेण अङ्प्रत्यये अजाद्यतष्टाप् इति(२) सूत्रेण टापि प्रमा इति रूपं सिध्यति । तस्य च उक्तः एव अर्थः । ज्ञाने प्रकर्षस्य यथाभूतार्थविषयत्वापेक्षया अन्यस्य वक्तुम् अशक्यत्वात् ।

अस्याः प्रमायाः करणं प्रमाणम् इत्यभिधीयते । करणं नाम साधकतमम् करणम् इति(३) पाणिन्युक्तेः । विद्यमानेषु कारणेषु अतिशयितं कारणम् । अत एव उक्तं जयन्तभट्टैः न्यायमञ्जर्याम् ।

प्रमीयते येन तत् प्रमाणम् इति करणसाधनः अयं प्रमाणशब्दः । करणं च साधकतमम्। तमबर्था अतिशयः । स च आपेक्षिकः साधनान्तरसम्भवे हि तदपेक्षया अतिशययोगात् किञ्चित् साधकतमम् उच्यते । इति

स च अतिशयः फलायोगराहित्यरूपः इति अभिप्रेत्य नवीनैः तार्किकैः फलायोगव्यवच्छिन्नं कारणं करणम् इति अभिहितम् ।

प्राञ्चः तु तम् अतिशयं व्यापारम् अभिप्रेत्य व्यापारवदसाधारणं कारणं करणम् इति जगदुः । अथवा कार्यत्वातिरिक्त धर्मावच्छिन्नकार्य

तानिरूपित कारणताश्रयत्वम् असाधारणकारणत्वं, अयमेव च अतिशयः करणे इति अभिप्रेत्य ईदृशम् एव करणत्वम् इति अपि वक्तुं शक्यम् । सर्वथा अपि तु अतिशयविशिष्टं कारणम् इति उक्तं न परित्यजन्ति । तता इदं सिद्धं यत् प्रमा नाम यथा भूतार्थविषयकं ज्ञानं तत्करणं च प्रमाणम् इति ।

१.३. मतभेदेन प्रमाणानि

सा च प्रमा कियत्सङ्ख्याका इति विषये वादिनां विप्रतिपत्तिः दृश्यते । तदुपजीव्या प्रमाणविषया विप्रतिपत्तिः अपि यथा–

१. चार्वाकाः प्रत्यक्षम् एकं प्रमाणं ब्रुवन्ति ।
२. वैशेषिकाः तु प्रत्यक्षानुमाने प्रमाणे इति सङ्गिरन्ति ।
३. बौध्दाः परं प्रत्यक्षानुमानशब्दान् प्रमाणानि आचक्षते ।
४. नैयायिकाः प्रत्यक्षानुमानोपमानशब्दाख्यानि चतुर्विधानि प्रमाणानि वदन्ति ।
५. प्राभाकराः अनुपलब्धिसहितानि उक्तानि प्रमाणानि स्वीकुर्वन्तः पञ्चप्रमाणानि इति ब्रुवते ।
६. भाट्टाः तु अर्थापत्त्यधिकानि उक्तानि पञ्च प्रमाणानि अभ्युपगच्छन्तः षट्त्वसङ्ख्या प्रमाणानां कथयन्ति ।
७. एवम् अन्ये अपि वादिनः अन्याम् अन्यां प्रमाणसङ्ख्यां भणन्ति । एतेषु च चार्वाकान् परित्यज्य अनुमानं प्रमाणम् इति विषये अन्येषां वादिनां सम्प्रतिपत्तिः अस्ति ।

१.४. अनुमानपरिचयः

प्रत्यक्षादिप्रमाणैः धूमादीनां ज्ञाने जाते सति हि अनुमानस्य व्याप्तिज्ञानस्य परामर्शस्य वा सम्भवः । अतः अन्वर्था एव इयं संज्ञा । अतः एव च



Scanned with CamScanner

भगवान् सूत्रकारः प्रत्यक्षं प्रमाणम् अभिधाय आह अथ तत्पूर्वकं त्रिविधम् अनुमानम्....इत्यादि(४) ।

अस्यायमर्थः ?

अत्र सूत्रे अथेत्यानन्तर्ये । उक्तं प्रत्यक्षमनुमानस्य हेतुः इदानीमनुमानं हेतुमद् व्युत्पाद्यत इत्यर्थः । इति तात्पर्यम् । तत्पूर्वकमिति । (१) तानि- (२) ते- (३) तत्- पूर्वं यस्येति तत्पूर्वकम् । (१) यदा तानीति विग्रहः तदा समस्तप्रमाणाभिसम्बन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति । पारम्पर्येण पुनस्तात् प्रत्यक्ष एव व्यवतिष्ठते इति तत्पूर्वकत्वमुक्तं भवति । (२) यदापि विवेकात् ते पूर्वे यस्येति- ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदन्तत्पूर्वकं प्रत्यक्षमिति । ते च द्वे प्रत्यक्षे लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यप्रत्यक्षम्, लिङ्गदर्शनम् द्वितीयम् । बुभुत्सावतो द्वितीयात् लिङ्गदर्शनात् स्मृतिः, स्मृत्यनन्तरञ्च पुनर्लिङ्गदर्शनम् । तदिदमन्तिमप्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं परामर्शरूपम् अनुमानं भवति । (३) यदा पुनः तत् पूर्वं यस्य ? तदिदन्तत्पूर्वकमिति- तदा भेदस्याविवक्षितत्वात् लिङ्गलिङ्गिसम्बन्धदर्शनानन्तरं लिङ्गदर्शनसम्बन्धस्मृतिः लिङ्गपरामर्शो विशिष्यते । इत्यादि वार्तिकेऽनुसन्धेयम् ।

तत्पूर्वं यस्येत्येतावन्मात्रे विग्रहेऽनुमानजन्येऽनु मानेऽव्याप्तिरतिव्याप्तिः प्रत्यक्षजन्येषु स्मरणसंशयादिज्ञानेष्वित्येव बीजं वार्तिकोक्तत्रिविध विग्रहोपन्यासस्य । अत्र च वार्तिके अनुमितिज्ञानानुमितिकरणयोः अनुमानपदाभिधेयोः विवेकः स्पष्टीकृतः ।

अप्रत्यक्षोऽर्थोऽनुमीयत इति । अग्निधूमौ सहितौ पश्यतीत्येकमप्रत्यक्षम्-अग्निसम्बध्दधूमस्य महानसादौ । पुनः पर्वते धूमम्पश्यतीति द्वितीयमप्रत्यक्षम् । पूर्वदृष्टसम्बन्धसहकृतेन चानेनाप्रत्यक्षस्याग्नेरनुमानम्(५)।

 ISSN - 2249 - 0663

तेन च प्रत्यक्षपूर्वकं प्रमाणम् इति कथयता अनुमानशब्दस्य अर्थः सूचितः एव भवति।

इदञ्च उपलक्षणम् । शब्दप्रमाणात् अपि जाते हेत्वादीनां ग्रहे अनुमानोन्मेषः भवति इति अनुभवात् सिध्देः प्रमाणसामान्यापेक्षम् एव इति वक्तुं शक्यते । एवञ्च अन्वर्था संज्ञा अनुमानस्य इति सिद्धम् ।

इदञ्च अनुमानम् अनुमित्यात्मिकां प्रमां जनयति । अतः एव अस्य अनुमानम् इति संज्ञा इत्यपि वक्तुं शक्यम् । अस्मिन् पक्षे अनुमितिः एव उक्ता अन्वर्थसंज्ञा । तदनुरोधेन च अनुमानस्य संज्ञा इति भवति सिद्धम् ।

इदञ्च अनुमानं किम् इत्यत्र पूर्वसूचितया दिशा अभिप्रायः भिन्नः दृश्यते । यथा व्यापारवदसाधारणं करणं कारणम् इति वदन्तः प्राञ्चः तृतीयलिङ्गपरामर्शं व्यापारं स्वीकृत्य तादृशव्यापारवदनुमित्यसाधारण कारणं च व्याप्तिज्ञानम् अनुमानं मन्यन्ते । फलायोगव्यवच्छिन्नं कारणं करणम् इति अभ्युपयन्तः अर्वाञ्चः फलस्य अनुमित्याख्यस्य अयोगेन असम्बन्धेन व्यवच्छिन्नं कारणं परामर्शम् अनुमानं मन्वते । न हि जाते परामर्शे अनुमितेः अनुत्पत्तिः । तस्य व्याप्तिज्ञानादिवत् परामर्शादिपरमुखानिरीक्षकत्वात् । अतः तदेव अनुमानं सम्प्रचक्षते ।

यद्यपि उक्तया रीत्या अनुमानस्वरूपे विप्रतिपत्तिः इव दृश्यते तथापि व्याप्तिज्ञानेन परामर्शः जायते । उभयं च कारणम् अनुमितिं प्रति इति अस्मिन् अंशे नास्ति विप्रतिपत्तिः उभयेषाम् ।

एवमेव अनुमितिं प्रति कारणीभूते ज्ञाने लिङ्गे साध्यव्याप्तिवैशिष्ट्यं वैज्ञानिकम् अपेक्षितम् इति अस्मिन् अंशे अपि नास्ति विरुद्धार्थप्रतिपादनम् ।

एवञ्च उभयेषाम् अपि मते साध्यव्याप्तिः हेतौ अपेक्षिता इति आयातं भवति ।



Scanned with CamScanner

१.५. लिङ्गत्रैविध्यम्

सा च साध्यव्याप्तिः अन्वयव्यतिरेकभेदेन द्विविधा अस्ति । तदनुरोधेन च लिङ्गम् इदं त्रिविधं भवति,

१. अन्वयव्यतिरेकि
२. केवलान्वयि
३. केवलव्यतिरेकि

इति भेदेन। यत्र अन्वयव्यतिरेकव्याप्ती उभे अपि स्तः तत् प्रथमम् यथा अयं व"िमान् धूमात् इत्यत्र धूमः ।

यत्र च व्यतिरेकव्याप्तिः न भवति अपि तु केवला अन्वयव्याप्तिः तत् केवलान्वयी । यथा इदं वाच्यं ज्ञेयत्वात् इत्यत्र ज्ञेयत्वं हेतुः । अत्र वाच्यत्वव्यतिरेकस्य असिद्धेः ।

यत्र तु अन्वयव्याप्तिः न भवति केवला तु व्यतिरेकव्याप्तिः तत् केवलव्यतिरेकि । यथा पृथिवी इतरेभ्यः भिद्यते गन्धवत्वात् इत्यत्र । अत्र अन्वयदृष्टान्ताभावेन अन्वयव्याप्तेः ग्रहीतुं अशक्तेः ।

अर्थापत्तिवादिनस्तु इदं केवलव्यतिरेकिलिङ्गं न स्वीकुर्वन्ति । अपि तु तत्स्थाने अर्थापत्तिप्रमाणजन्याम् अर्थापत्तिप्रमितिम् एव स्वीकुर्वन्ति । भणन्ति च तत्र दोषं– कथं साध्याभावनिष्ठेन हेत्वभावव्याप्यत्वेन हेतोः साध्यसाधकत्वं सम्भावयितुं शक्यम् । नहि अन्यनिष्ठः धर्मः कार्यान्तरम् अनिष्टं प्रयोजयति इत्येवमादिकम् ।

परन्तु तैः अर्थापत्तिवादिभिः अपि पीनः देवदत्तः दिवा न भुङ्क्ते इत्यादौ रात्रिभोजन दिवाऽभुञ्जानत्वविशिष्ट पीनत्वयोः व्याप्तिं अभिसन्धायैव रात्रिभोजनं साधनीयं भवति एतादृशव्याप्तिग्रहाभावे अर्थापत्युदयस्य वक्तुम् अशक्यत्वेन अवश्यं तस्य भङ्ग्यन्तरेणापि स्वीकर्तव्यत्वात् ।

तता व्याप्तिग्रहजन्यत्वेन अनुमितित्वप्रसक्तौ केवलम् अर्थापत्या

 ISSN - 2249 - 0663

अमुम् अर्थम् अज्ञासिषम् इति अनुव्यवसायेन स्वानुभवैकसमधिगम्येन अर्थापत्तेः प्रमित्यन्तरत्वं, तज्जनकस्य प्रमाणान्तरत्वं च स्वीकर्तव्यम् ।

यदि तादृशः अनुव्यवसायः केवलं शपथपथोन्नेयः भवेत् तर्हि तदनुरोधेन कस्यचित् अर्थस्य निर्णेतुम् अशक्यत्वेन अर्थापत्याख्यः प्रमाविशेषः तत्करणं वा अप्रामाणिकम् इत्येव सिद्धं भवेत् । तता असिद्धे अर्थापत्तिप्रमाणे "पृथिवी इतरभिन्ना" इत्यादिस्थले कस्याति गतेः वक्तव्यतया अवश्यकमेव साध्याभावनिष्ठा हेत्वभावव्याप्यता केनचित् सम्बन्धेन हेतौ आनेया वक्तव्या वा । तदनु मितिः भवति साध्यस्य इत्येव गतिः साध्वी भवति । लाघवस्य अतिरिक्तप्रमादीनाम् अकल्पनाप्रयुक्तस्य सत्वात् ।

एवञ्च केवलव्यतिरेकव्याप्तिमत् लिङ्गं किञ्चित् युक्तिसहम् इत्येव बलात् स्वीकर्तव्यम् । एतावता च इदम् आयातं यत् द्विविधव्याप्तिविशिष्टेन लिङ्गेन साध्यस्य अनुमानं कर्तुं शक्यम् इति ।

१.६. प्रमायाः गुणजन्यत्वम्

अथ च एतादृशस्य लिङ्गस्य पक्षवृत्तिः अस्ति चेत् अपि च व्याप्तिपक्षधर्मताविशिष्टतया ज्ञातं चेत् तर्हि अनुमितिः उदेति ।

एवं जायमानायाम् अस्याम् अनुमितौ प्रमात्वं जायते । तत्र च कारणं व्यापकवति व्याप्यपरामर्शात्मकः गुणः । प्रमात्वोत्पत्तौ गुणस्य अपेक्षायाः सिद्धान्तसिद्धत्वात् (७)। यदि तु एतादृशः गुणः न स्यात् तदा सा अनुमितिः प्रमात्वोत्पत्तेः अयोग्या सती भ्रमः सम्पद्यते । भ्रमत्वोत्पत्तौ तु न केवलं गुणाभावः कारणम् अपि तु दोषः अपि ।

१.७. दोषज्ञानस्यावश्यकता

स च दोषः प्रधानतः हेतुनिष्ठः भवति। यदा च दुष्टः हेतुः तदा

अयं हेत्वाभासः उच्यते । हेतुवत् आभासते न तु वस्तुतः साध्यसाधकः अयम् इति अन्वर्थसंज्ञा इयम् । दुष्टः हेतुः इत्यपि प्रवादः अस्त्येव तन्त्रे ।

यथा च लोके धर्मः जिज्ञास्यः सम्पादनाय अधर्मः अपि जिज्ञास्यः परिहाराय इति दृश्यते तद्वत् प्रकृते अनुमितौ गुणः इव दोषः अपि सम्यक् एव जिज्ञास्य परिहाराय । अन्यथा दोषाणाम् अज्ञाने तत्परिहारस्य कर्तुम् अशक्यत्वात् तत्त्वनिर्णयः न स्यात् । अतः एव उक्तं मणिकृता ? अथ हेत्वाभासाः तत्त्वनिर्णयविजयप्रयोजकत्वात् निरूप्यन्ते(७)इति ।

दोषाणां च असङ्ख्येयत्वात् तेषां वैयक्तिकं ज्ञानं न सर्वज्ञव्यतिरिक्तेण सुज्ञेयम् इत्यतः तेषु सामान्यलक्षणं, तदनुरोधेन विशेषतः विभागः, तदनुसृत्य पुनः विशेषलक्षणं तत्र च सुलभज्ञाने उपायाः इत्यमी विषयाः साधु ज्ञातव्याः ।

एवं रीत्या विषयविज्ञाने गोरिव अपूर्वायाः लक्षणेन सामान्यविषयेण सास्नादिमत्वेन तदनन्तरं विभागेन नन्दिनी ? सुरभिः इत्येवम् अवान्तरविषयेण तदनु च गोधूमवर्णादिना विशेषलक्षणेन तत्परिज्ञाने गोपालप्रसिद्धेन सुलभोपायेन सहितेन ज्ञानं समीचीनां रीतिम् अनुसरत् यथार्थं जायते । न अन्यथा । इत्यतः एतेषां विषयाणां ज्ञानम् अपेक्षितम् ।

प्रकृते च अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वम् इति सामान्यलक्षणं ज्ञातव्यम् । तच्च सर्वेषु हेत्वाभासेषु समम् । एदञ्च दोषस्यैव लक्षणं भवति । तद्वत्वं तु दुष्टस्य। तस्य च विशेषतः विभागः प्राचीनैः एवं कृतः ?

सव्यभिचार–विरुद्ध–प्रकरणसम–साध्यसम–कालातीता हेत्वाभासाः(८) ॥

१. अनैकान्तिकः सव्यभिचारः(९)॥
२. सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः(१०)॥
३. यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः(११)॥

४. साध्याविशिष्टः साध्यत्वात् साध्यसमः(१२)॥

५. कालात्ययापदिष्टः कालातीतः(१३)॥

नव्यैस्तु एवं विभज्यते–

१. सव्यभिचारोऽनैकान्तिकः ।

२. साध्याभावव्याप्तो हेतोर्विरुद्धः।

३. यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः ।

४. असिद्धः ।

५. यस्य साध्याभावः प्रमाणान्तरेण निितिः स बाधितः ।

एतेषु विभागेषु व्यभिचाराख्यः दोषः प्रथमः। तत्र च उदाहरणं भवति "पर्वतः धूमवान् वह्निः" इति प्रयोगे वह्निः । वह्निः धूमस्य व्यभिचारी । कथं व्यभिचारी भवति इति ज्ञातुं तु पुनः उक्तस्य विशेषस्य लक्षणं ज्ञातव्यम् । तच्च साध्याभाववद्वृत्तित्वम् इति । इदञ्च स्वरूपलक्षणं विशेषस्य अस्य। नातः साध्यीभूतधूमाभाववति वृत्तित्वस्य वह्नौ सत्वेन कथं दोषलक्षणत्वम् अस्य इति शङ्कायाः अवकाशः ।

---

१. अष्टा–३–३–१०६
२. अष्टा–४–१–४
३. अष्टा–१–४–४२
४. न्या.सू...१–१–५
५. चौ.स.ग्र.२८१ पृ.सं ७३–७५
६. दोषोऽप्रमाया जनकः प्रमायास्तु गुणे भवेत्।१३१॥ का.सं.ग्र–६,पु.सं–४२८
७. के.सं.वि.ग्र–४३,पु.सं–१
८. न्या०.सू. १–२–४
९. न्या०.सू. १–२–५
१०. न्या०.सू. १–२–६
११. न्या०.सू. १–२–७
१२. न्या०.सू. १–२–८
१३. न्या०.सू. १–२–९

ISSN - 2249 - 0663

# ज्ञानस्वरूपम्

–विद्वान् भास्कर जोशि

अस्ति तावत् सर्वेषां प्राणिनां ज्ञानापेक्षा आजन्म आ च मरणात् । यथा हि सद्य एव लब्धजन्मा बालः स्वीयां मातरं स्तन्यदायिनीं ज्ञात्वा स्तन्यपानप्रकारं च स्तन्यं पीत्वा जीवति वर्धते वा तथैव हि सर्वे जनाः अन्यासु अवस्थासु तं तम् उपायं स्वहिताय अहितपरिहाराय वा ज्ञात्वा एव तस्मिंस्तस्मिन् उपाये प्रवर्तमानः स्वम् इष्टम् आप्नोति अनिष्टं वा दूरीकुरुते इति सर्वेषां नः सुविदितमेव ।

तच्च ज्ञानं यदि यथार्थं स्यात् तर्हि पुमान् तेन ज्ञानेन फलम् आप्नोति अन्यथा तु न आप्नोति इष्टं क्वचित् अनिष्टम् एव वा आप्नोति, यथा बालः हनूमान् सूर्यं फलं मत्वा तत्समीपं गतः अपि नाप क्षुधः निवारणं तृप्तिं वा आप्तवांस्तु देवराजस्य महतः क्रोधफम् । बालस्य तस्य यत् फलत्वज्ञानं सूर्ये तस्य अवस्तुविषयत्वात् । तदेव किञ्चित् फलम् आम्रादि दृष्ट्वा यदि तेन आशास्यत, अवश्यं तेन तृप्तिः अलप्स्यत तदनेन विज्ञायते यत् अस्ति समीचीनस्य ज्ञानस्य अपेक्षा इति ।

अतः एव वृध्दैः उक्तम्–

सर्पान् कुशाग्राणि तथोदपानं
ज्ञात्वा मनुष्याः परिवर्जयन्ति ।
अज्ञानतः तत्र पतन्ति केचित्
ज्ञाने फलं पश्य यथाविशिष्टम् ॥ इति॥

अत्र श्लोके ज्ञानाज्ञानयोः यथा विरुद्धफलजनकत्वम् अभिमतं तथैव समीचीनज्ञानतद्विरुध्दज्ञानयोः अपि इत्येतत् अपि विवक्षितम् अस्ति । यथा च ज्ञाने सति कूपादेः तत्रापतनम्, अज्ञाने सति तत्र पतनं च भवतः तथैव समीचीनज्ञाने सत्येव तत्र अपातः तद्विरूद्धज्ञाने सति तु तत्र पातः एव इत्योपि वक्तुं शक्यम् ।

वस्तुतस्तु अत्र ज्ञानपदेन समीचीनं ज्ञानम् एव विवक्षितम् आस्ते । औत्पातिकेन ज्ञानेन समीचीनस्य फलस्य लब्धुम् अशक्यत्वात्। तथा च उक्तः श्लोकः समीचीनज्ञानापेक्षाम् एव स्थिरीकरोति इति सिध्यति ।

१.२. ज्ञानद्वैविध्यं प्रमाकरणविवेचनञ्च

तच्च यथाभूतार्थविषयं ज्ञानं प्रमा इति उच्यते, तद्भिन्नं ज्ञानं च अप्रमा इति भ्रमः इति वा । प्र इत्युपसर्गपूर्वकात् माङ् माने इति धातोः आतोोपसर्गे(१) इति सूत्रेण अङ्प्रत्यये अजाद्यतष्टाप् इति(२) सूत्रेण टापि प्रमा इति रूपं सिध्यति । तस्य च उक्तः एव अर्थः । ज्ञाने प्रकर्षस्य यथाभूतार्थविषयत्वापेक्षया अन्यस्य वक्तुम् अशक्यत्वात् ।

अस्याः प्रमायाः करणं प्रमाणम् इत्यभिधीयते । करणं नाम साधकतमम् करणम् इति(३) पाणिन्युक्तेः । विद्यमानेषु कारणेषु अतिशयितं कारणम् । अत एव उक्तं जयन्तभट्टैः न्यायमञ्जर्याम् ।

प्रमीयते येन तत् प्रमाणम् इति करणसाधनः अयं प्रमाणशब्दः । करणं च साधकतमम्। तमबर्था अतिशयः । स च आपेक्षिकः साधनान्तरसम्भवे हि तदपेक्षया अतिशययोगात् किञ्चित् साधकतमम् उच्यते । इति

स च अतिशयः फलायोगराहित्यरूपः इति अभिप्रेत्य नवीनैः तार्किकैः फलायोगव्यवच्छिन्नं कारणं करणम् इति अभिहितम् ।

प्राञ्चः तु तम् अतिशयं व्यापारम् अभिप्रेत्य व्यापारवदसाधारणं कारणं करणम् इति जगदुः । अथवा कार्यत्वातिरिक्त धर्मावच्छिन्नकार्य

तानिरूपित कारणताश्रयत्वम् असाधारणकारणत्वं, अयमेव च अतिशयः करणे इति अभिप्रेत्य ईदृशम् एव करणत्वम् इति अपि वक्तुं शक्यम् । सर्वथा अपि तु अतिशयविशिष्टं कारणम् इति उक्तं न परित्यजन्ति । तता इदं सिद्धं यत् प्रमा नाम यथा भूतार्थविषयकं ज्ञानं तत्करणं च प्रमाणम् इति ।

१.३. मतभेदेन प्रमाणानि

सा च प्रमा कियत्सङ्ख्याका इति विषये वादिनां विप्रतिपत्तिः दृश्यते । तदुपजीव्या प्रमाणविषया विप्रतिपत्तिः अपि यथा–

१. चार्वाकाः प्रत्यक्षम् एकं प्रमाणं ब्रुवन्ति ।
२. वैशेषिकाः तु प्रत्यक्षानुमाने प्रमाणे इति सङ्गिरन्ति ।
३. बौध्दाः परं प्रत्यक्षानुमानशब्दान् प्रमाणानि आचक्षते ।
४. नैयायिकाः प्रत्यक्षानुमानोपमानशब्दाख्यानि चतुर्विधानि प्रमाणानि वदन्ति ।
५. प्राभाकराः अनुपलब्धिसहितानि उक्तानि प्रमाणानि स्वीकुर्वन्तः पञ्चप्रमाणानि इति ब्रुवते ।
६. भाट्टाः तु अर्थापत्त्यधिकानि उक्तानि पञ्च प्रमाणानि अभ्युपगच्छन्तः षट्त्वसङ्ख्या प्रमाणानां कथयन्ति ।
७. एवम् अन्ये अपि वादिनः अन्याम् अन्यां प्रमाणसङ्ख्यां भणन्ति । एतेषु च चार्वाकान् परित्यज्य अनुमानं प्रमाणम् इति विषये अन्येषां वादिनां सम्प्रतिपत्तिः अस्ति ।

१.४. अनुमानपरिचयः

प्रत्यक्षादिप्रमाणैः धूमादीनां ज्ञाने जाते सति हि अनुमानस्य व्याप्तिज्ञानस्य परामर्शस्य वा सम्भवः । अतः अन्वर्था एव इयं संज्ञा । अतः एव च

भगवान् सूत्रकारः प्रत्यक्षं प्रमाणम् अभिधाय आह अथ तत्पूर्वकं त्रिविधम् अनुमानम्....इत्यादि(४) ।

अस्यायमर्थः ?

अत्र सूत्रे अथेत्यानन्तर्ये । उक्तं प्रत्यक्षमनुमानस्य हेतुः इदानीमनुमानं हेतुमद् व्युत्पाद्यत इत्यर्थः । इति तात्पर्यम् । तत्पूर्वकमिति । (१) तानि- (२) ते- (३) तत्- पूर्वं यस्येति तत्पूर्वकम् । (१) यदा तानीति विग्रहः तदा समस्तप्रमाणाभिसम्बन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति । पारम्पर्येण पुनस्तात् प्रत्यक्ष एव व्यवतिष्ठते इति तत्पूर्वकत्वमुक्तं भवति । (२) यदापि विवेकात् ते पूर्वे यस्येति- ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदन्तत्पूर्वकं प्रत्यक्षमिति । ते च द्वे प्रत्यक्षे लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यप्रत्यक्षम्, लिङ्गदर्शनम् द्वितीयम् । बुभुत्सावतो द्वितीयात् लिङ्गदर्शनात् स्मृतिः, स्मृत्यनन्तरञ्च पुनर्लिङ्गदर्शनम् । तदिदमन्तिमप्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं परामर्शरूपम् अनुमानं भवति । (३) यदा पुनः तत् पूर्वं यस्य ? तदिदन्तत्पूर्वकमिति- तदा भेदस्याविवक्षितत्वात् लिङ्गलिङ्गिसम्बन्धदर्शनानन्तरं लिङ्गदर्शनसम्बन्धस्मृतिः लिङ्गपरामर्शो विशिष्यते । इत्यादि वार्तिकेऽनुसन्धेयम् ।

तत्पूर्वं यस्येत्येतावन्मात्रे विग्रहेऽनुमानजन्येऽनु मानेऽव्याप्तिरतिव्याप्तिः प्रत्यक्षजन्येषु स्मरणसंशयादिज्ञानेष्वित्येव बीजं वार्तिकोक्तत्रिविध विग्रहोपन्यासस्य । अत्र च वार्तिके अनुमितिज्ञानानुमितिकरणयोः अनुमानपदाभिधेयोः विवेकः स्पष्टीकृतः ।

अप्रत्यक्षोऽर्थोऽनुमीयत इति । अग्निधूमौ सहितौ पश्यतीत्ये कम्प्रत्यक्ष-मग्निसम्बद्धधूमस्य महानसादौ । पुनः पर्वते धूमम्पश्यतीति द्वितीयप्रत्यक्षम् । पूर्वदृष्टसम्बन्धसहकृतेन चानेनाप्रत्यक्षस्याग्नेरनुमानम्(५)।

 ISSN - 2249 - 0663

तेन च प्रत्यक्षपूर्वकं प्रमाणम् इति कथयता अनुमानशब्दस्य अर्थः सूचितः एव भवति।

इदञ्च उपलक्षणम् । शब्दप्रमाणात् अपि जाते हेत्वादीनां ग्रहे अनुमानोन्मेषः भवति इति अनुभवात् सिध्देः प्रमाणसामान्यापेक्षम् एव इति वक्तुं शक्यते । एवञ्च अन्वर्था संज्ञा अनुमानस्य इति सिद्धम् ।

इदञ्च अनुमानम् अनुमित्यात्मिकां प्रमां जनयति । अतः एव अस्य अनुमानम् इति संज्ञा इत्यपि वक्तुं शक्यम् । अस्मिन् पक्षे अनुमितिः एव उक्ता अन्वर्थसंज्ञा । तदनुरोधेन च अनुमानस्य संज्ञा इति भवति सिद्धम् ।

इदञ्च अनुमानं किम् इत्यत्र पूर्वसूचितया दिशा अभिप्रायः भिन्नः दृश्यते । यथा व्यापारवदसाधारणं करणं कारणम् इति वदन्तः प्राञ्चः तृतीयलिङ्गपरामर्शं व्यापारं स्वीकृत्य तादृशव्यापारवदनुमित्यसाधारण कारणं च व्याप्तिज्ञानम् अनुमानं मन्यन्ते । फलायोगव्यवच्छिन्नं कारणं करणम् इति अभ्युपयन्तः अर्वाञ्चः फलस्य अनुमित्याख्यस्य अयोगेन असम्बन्धेन व्यवच्छिन्नं कारणं परामर्शम् अनुमानं मन्वते । न हि जाते परामर्शे अनुमितेः अनुत्पत्तिः । तस्य व्याप्तिज्ञानादिवत् परामर्शादिपरमुखानिरीक्षकत्वात् । अतः तदेव अनुमानं सम्प्रचक्षते ।

यद्यपि उक्तया रीत्या अनुमानस्वरूपे विप्रतिपत्तिः इव दृश्यते तथापि व्याप्तिज्ञानेन परामर्शः जायते । उभयं च कारणम् अनुमितिं प्रति इति अस्मिन् अंशे नास्ति विप्रतिपत्तिः उभयेषाम् ।

एवमेव अनुमितिं प्रति कारणीभूते ज्ञाने लिङ्गे साध्यव्याप्तिवैशिष्ट्यं वैज्ञानिकम् अपेक्षितम् इति अस्मिन् अंशे अपि नास्ति विरुद्धार्थप्रतिपादनम् ।

एवञ्च उभयेषाम् अपि मते साध्यव्याप्तिः हेतौ अपेक्षिता इति आयातं भवति ।

१.५. लिङ्गत्रैविध्यम्

सा च साध्यव्याप्तिः अन्वयव्यतिरेकभेदेन द्विविधा अस्ति । तदनुरोधेन च लिङ्गम् इदं त्रिविधं भवति,

१. अन्वयव्यतिरेकि

२. केवलान्वयि

३. केवलव्यतिरेकि

इति भेदेन। यत्र अन्वयव्यतिरेकव्याप्ती उभे अपि स्तः तत् प्रथमम् यथा अयं व"मान् धूमात् इत्यत्र धूमः ।

यत्र च व्यतिरेकव्याप्तिः न भवति अपि तु केवला अन्वयव्याप्तिः तत् केवलान्वयी । यथा इदं वाच्यं ज्ञेयत्वात् इत्यत्र ज्ञेयत्वं हेतुः । अत्र वाच्यत्वव्यतिरेकस्य असिद्धेः ।

यत्र तु अन्वयव्याप्तिः न भवति केवला तु व्यतिरेकव्याप्तिः तत् केवलव्यतिरेकि । यथा पृथिवी इतरेभ्यः भिद्यते गन्धवत्वात् इत्यत्र । अत्र अन्वयदृष्टान्ताभावेन अन्वयव्याप्तेः ग्रहीतुं अशक्तेः ।

अर्थापत्तिवादिनस्तु इदं केवलव्यतिरेकिलिङ्गं न स्वीकुर्वन्ति । अपि तु तत्स्थाने अर्थापत्तिप्रमाणजन्याम् अर्थापत्तिप्रमितिम् एव स्वीकुर्वन्ति । भणन्ति च तत्र दोषं– कथं साध्याभावनिष्ठेन हेत्वभावव्याप्यत्वेन हेतोः साध्यसाधकत्वं सम्भावयितुं शक्यम् । नहि अन्यनिष्ठः धर्मः कार्यान्तरम् अनिष्ठं प्रयोजयति इत्येवमादिकम् ।

परन्तु तैः अर्थापत्तिवादिभिः अपि पीनः देवदत्तः दिवा न भुङ्क्ते इत्यादौ रात्रिभोजन दिवाऽभुञ्जानत्वविशिष्ट पीनत्वयोः व्याप्तिं अभिसन्धायैव रात्रिभोजनं साधनीयं भवति एतादृशव्याप्तिग्रहाभावे अर्थापत्युदयस्य वक्तुम् अशक्यत्वेन अवश्यं तस्य भङ्ग्यन्तरेणापि स्वीकर्तव्यत्वात् ।

तता व्याप्तिग्रहजन्यत्वेन अनुमितित्वप्रसक्तौ केवलम् अर्थापत्या

 ISSN - 2249 - 0663

अमुम् अर्थम् अज्ञासिषम् इति अनुव्यवसायेन स्वानुभवैकसमधिगम्येन अर्थापत्तेः प्रमित्यन्तरत्वं, तज्जनकस्य प्रमाणान्तरत्वं च स्वीकर्तव्यम् ।

यदि तादृशः अनुव्यवसायः केवलं शपथपथोन्नेयः भवेत् तर्हि तदनुरोधेन कस्यचित् अर्थस्य निर्णेतुम् अशक्यत्वेन अर्थापत्याख्यः प्रमाविशेषः तत्करणं वा अप्रामाणिकम् इत्येव सिद्धं भवेत् । तता असिद्धे अर्थापत्तिप्रमाणे "पृथिवी इतरभिन्ना" इत्यादिस्थले कस्याति गतेः वक्तव्यतया अवश्यकमेव साध्याभावनिष्ठा हेत्वभावव्याप्यता केनचित् सम्बन्धेन हेतौ आनेया वक्तव्या वा । तदनु मितिः भवति साध्यस्य इत्येव गतिः साध्वी भवति । लाघवस्य अतिरिक्तप्रमादीनाम् अकल्पनाप्रयुक्तस्य सत्वात् ।

एवञ्च केवलव्यतिरेकव्याप्तिमत् लिङ्गं किञ्चित् युक्तिसहम् इत्येव बलात् स्वीकर्तव्यम् । एतावता च इदम् आयातं यत् द्विविधव्याप्तिविशिष्टेन लिङ्गेन साध्यस्य अनुमानं कर्तुं शक्यम् इति ।

१.६. प्रमायाः गुणजन्यत्वम्

अथ च एतादृशस्य लिङ्गस्य पक्षवृत्तिः अस्ति चेत् अपि च व्याप्तिपक्षधर्मताविशिष्टतया ज्ञातं चेत् तर्हि अनुमितिः उदेति ।

एवं जायमानायाम् अस्याम् अनुमितौ प्रमात्वं जायते । तत्र च कारणं व्यापकवति व्याप्यपरामर्शात्मकः गुणः । प्रमात्वोत्पत्तौ गुणस्य अपेक्षायाः सिद्धान्तसिद्धत्वात् (७)। यदि तु एतादृशः गुणः न स्यात् तदा सा अनुमितिः प्रमात्वोत्पत्तेः अयोग्या सती भ्रमः सम्पद्यते । भ्रमत्वोत्पत्तौ तु न केवलं गुणाभावः कारणम् अपि तु दोषः अपि ।

१.७. दोषज्ञानस्यावश्यकता

स च दोषः प्रधानतः हेतुनिष्ठः भवति। यदा च दुष्टः हेतुः तदा



Scanned with CamScanner

अयं हेत्वाभासः उच्यते । हेतुवत् आभासते न तु वस्तुतः साध्यसाधकः अयम् इति अन्वर्थसंज्ञा इयम् । दुष्टः हेतुः इत्यपि प्रवादः अस्त्येव तन्त्रे ।

यथा च लोके धर्मः जिज्ञास्यः सम्पादनाय अधर्मः अपि जिज्ञास्यः परिहाराय इति दृश्यते तद्वत् प्रकृते अनुमितौ गुणः इव दोषः अपि सम्यक् एव जिज्ञास्य परिहाराय । अन्यथा दोषाणाम् अज्ञाने तत्परिहारस्य कर्तुम् अशक्यत्वात् तत्त्वनिर्णयः न स्यात् । अतः एव उक्तं मणिकृता ? अथ हेत्वाभासाः तत्त्वनिर्णयविजयप्रयोजकत्वात् निरूप्यन्ते(७)इति ।

दोषाणां च असङ्ख्येयत्वात् तेषां वैयक्तिकं ज्ञानं न सर्वज्ञव्यतिरिक्तेण सुज्ञेयम् इत्यतः तेषु सामान्यलक्षणं, तदनुरोधेन विशेषतः विभागः, तदनुसृत्य पुनः विशेषलक्षणं तत्र च सुलभज्ञाने उपायाः इत्यमी विषयाः साधु ज्ञातव्याः ।

एवं रीत्या विषयविज्ञाने गोरिव अपूर्वायाः लक्षणेन सामान्यविषयेण सास्नादिमत्वेन तदनन्तरं विभागेन नन्दिनी ? सुरभिः इत्येवम् अवान्तरविषयेण तदनु च गोधूमवर्णादिना विशेषलक्षणेन तत्परिज्ञाने गोपालप्रसिद्धेन सुलभोपायेन सहितेन ज्ञानं समीचीनां रीतिम् अनुसरत् यथार्थं जायते । न अन्यथा । इत्यतः एतेषां विषयाणां ज्ञानम् अपेक्षितम् ।

प्रकृते च अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वम् इति सामान्यलक्षणं ज्ञातव्यम् । तच्च सर्वेषु हेत्वाभासेषु समम् । एदञ्च दोषस्यैव लक्षणं भवति । तद्वत्वं तु दुष्टस्य। तस्य च विशेषतः विभागः प्राचीनैः एवं कृतः ?

सव्यभिचार–विरुद्ध–प्रकरणसम–साध्यसम–कालातीता हेत्वाभासाः(८) ॥

१. अनैकान्तिकः सव्यभिचारः(९)॥

२. सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः(१०)॥

३. यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः(११)॥



Scanned with CamScanner

 ISSN - 2249 - 0663

४.  साध्याविशिष्टः साध्यत्वात् साध्यसमः(१२)॥

५.  कालात्ययापदिष्टः कालातीतः(१३)॥

नव्यैस्तु एवं विभज्यते-

१.  सव्यभिचारोऽनैकान्तिकः ।

२.  साध्याभावव्याप्तो हेतोर्विरुद्धः।

३.  यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः ।

४.  असिद्धः ।

५.  यस्य साध्याभावः प्रमाणान्तरेण निितिः स बाधितः ।

एतेषु विभागेषु व्यभिचाराख्यः दोषः प्रथमः। तत्र च उदाहरणं भवति "पर्वतः धूमवान् वह्निः" इति प्रयोगे वह्निः । वह्निः धूमस्य व्यभिचारी । कथं व्यभिचारी भवति इति ज्ञातुं तु पुनः उक्तस्य विशेषस्य लक्षणं ज्ञातव्यम् । तच्च साध्याभाववद्वृत्तित्वम् इति । इदञ्च स्वरूपलक्षणं विशेषस्य अस्य। नातः साध्यीभूतधूमाभाववति वृत्तित्वस्य वह्नौ सत्वेन कथं दोषलक्षणत्वम् अस्य इति शङ्कायाः अवकाशः ।

---

१.  अष्टा-३-३-१०६  २.  अष्टा-४-१-४

३.  अष्टा-१-४-४२  ४.  न्या.सू...१-१-५

५.  चौ.स.ग्र.२८१ पृ.सं ७३-७५

६.  दोषोऽप्रमाया जनकः प्रमायास्तु गुणे भवेत्।१३१॥
का.सं.ग्र-६,पु.सं-४२८

७.  के.सं.वि.ग्र-४३,पु.सं-१  ८.  न्या०.सू. १-२-४

९.  न्या०.सू. १-२-५  १०.  न्या०.सू. १-२-६

११.  न्या०.सू. १-२-७  १२.  न्या०.सू. १-२-८

१३.  न्या०.सू. १-२-९



Scanned with CamScanner